होमो येषु ते तिष्ठद्धोमाः वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये ते यजतय उच्यन्ते” कर्कः ।

**तिष्य** पु० तुष्यन्त्यस्मिन् तुष–क्यप् नि०। १पुष्यनक्षत्रे । त्विष–दीप्तौ यक् अघ्न्यादि० नि०। २कलियुगे न०। तिष्ये नक्षत्रे जातः अण् तस्य लुक् । ३पुष्यनक्षत्रजाते त्रि० । तिष्यं नक्षत्रमस्त्यत्र पौर्णमास्याम् अच् । ४पौषमासे शब्दरत्ना०। स्वार्थे क । पौषमासे शब्दा० । तत्र पुष्यनक्षत्रे । “यदा सूर्य्यश्च चन्द्रश्च तथा तिष्यबृहस्पती । एकराशौ समेष्यन्ति प्रवत्स्यति तदा कृतम्” । भा० व० १९० ८९ श्लो० कलियुगे “ततस्तिष्ये ऽथ संप्राप्ते युगे कलिपुरस्कृते । एकपादस्थितो धर्मो यत्र तिष्ये भविष्यति” भा० शा० २४२ अ०। “सत्सम्प्रदायप्रथनाय तिष्ये शिष्यैश्चतुर्भिः सह योऽवतीर्णः। उक्तो बृहत्सङ्कमतन्त्रराजे श्रीशङ्कराचार्य्यगुरुं तमीडे । “तपस्त्वादृक् क्व वा तिष्ये तिष्ये योगः क्व तादृशः। क्व वा व्रतं क्व वा दानं तिष्ये मोक्षस्ततः कुतः” काशीख० ३५ अ०।५।माङ्गल्ये त्रि०। [शब्दर०।

**तिष्यपुष्पा** स्त्री० तिष्यं माङ्गल्यं पुष्पं यस्याः। आमलक्याम्

**तिष्यफला** स्त्री तिष्यं माङ्गल्यं फलमस्याः । आमलक्याम् अमरः । “नित्यमामलके लक्ष्मीः” स्मृतेस्तत्फलस्य मङ्गलहेतुत्वात् तथात्वम् । [क्याम् शब्दरत्ना०।

**तिष्या** स्त्री तिष्यं मङ्गलं हेतुत्वेनास्त्यस्या अच् । आमल-

**तिसृधन्व** न० तिसृभिरिषुभिर्युतं धन्व धनुः वेदे अच् समासान्तः अविभक्तावपि वेदे तिस्रादेशः । तिसृभिरिषुभिर्युक्ते धनुषि “तिसृधन्वं दक्षिणां ददाति” शत० ब्रा० ११।१।५।१० । “स तिसृधन्वमादायापचक्राम” १४।१।१।७ । [४सद्भावे च संक्षिप्तसारः।

**तिहन्** पु० तुह–अर्दने कनिन् नि०। १व्याधौ २व्रीहौ ३धनुषि

**तीक** गतौ भ्वा० पर० सक० सेट् । तीकते अतीकिष्ट तितीके अदित् अतितीकत् त । शब्दस्तोमे याचनार्थतोक्तिः प्रामादिकी पा० गणपाठे तस्य गत्यर्थतयैवोक्तेः ।

**तीक्ष्ण** न० तिज–क्स्न दीर्घश्च । १खरे स्पर्शे २विषे ३लौहभेदे (इस्पात) ४युद्धे अमरः ५मरणे ६शस्त्रे ७शीघ्रे इति सारसु० । ८सामुद्रलवणे ९मुष्कके मेदि० १०चव्यके राजनि० । ११मरके हेमच० । १२तीक्ष्णतायुक्ते त्रि० “तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः” मनुः। “तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापवत्” माघः “शक्तिं चोभयतस्तीक्ष्णाम्” मनुः । “प्रतिभायां हीरके कटाक्षे दुर्व्वाक्ये नखे लवणे रविकरे” इति कविकल्पलतायां तीक्ष्णत्वमुक्तम् । १३यवक्षारे पु० मेदि० । १४श्वेतकुशे १५ कुन्दुरुके राजनि० । नक्षत्रविशेषगणे न० यथा “शक्राहिशिवमूलाश्च मन्दाहस्तीक्ष्णदारुणे” ज्योतिषम् ।१६आत्मत्यागिनि त्रि० मेदि० ।१७निरालस्ये सुबुद्धौ त्रि० धरणी० १८योगिनि पु० अजयपालः । [राजनि० ।

**तीक्ष्णक** पु० तीक्ष्ण+संज्ञायां कन् । १गौरसर्षपे, २मुष्कके च

**तीक्ष्णकण्टक** पु० तीक्ष्णः कण्टकोऽस्य । १धुस्तूरे २बर्बुरे, ३इङ्गुदीवृक्षे, ४वंशे च जटाध०।५कन्थारीवृक्षे स्त्री टाप् । राजनि०। ६तीक्ष्णकण्टकयुक्ते त्रि०। कर्म्म० । ७तीक्ष्णे कण्टके पुंन० ।

**तीक्ष्णकन्द** पु० तीक्ष्णः कन्दो मूलमस्य । पलाण्डौ राजनि०

**तीक्ष्णकर्म्मन्** त्रि० तीक्ष्णं कर्मास्य । १तीव्रकार्य्यकरे आयःस्फूलिके त्रिका० । कर्म्म० । २तीव्रे कर्म्मणि न० ।

**तीक्ष्णकल्क** पु० तीक्ष्णः कल्कोऽस्य । तुम्बुरुवृक्षे राजनि० ।

**तीक्ष्णकान्ता** स्त्री नि० कर्म्म० । तारादेव्याम् उग्रतारायाम् । “पीठे दिक्करवासिन्या द्विरूपा वसते शिवा । तीक्ष्णकान्ताह्वया त्वेका योग्रतारा प्रकीर्तिता” । “पुरा ललितकान्ताख्या या श्रीमङ्गलचण्डिका । तस्यास्तु सततं रूपं तीक्ष्णकान्ताह्वयं नृप ! । कृष्णा लम्बोदरी या तु सा स्यादेकजटा शिवा । तेन रूपेण तां देवीं सततं परिपूजयेत्” कालि०पु० ८२ अ० ।

**तीक्ष्णगन्ध** पु० तीक्ष्णः गन्धोऽस्य । १शोभाञ्जनवृक्षे जटा० । वा कप् । अत्र वार्थे राजनि० । २रक्ततुलस्याम् शब्दा० कुन्दुरुनामगन्धद्रव्ये अमरः ।

**तीक्ष्णगन्धा** स्त्री तीक्ष्णः गन्धोऽस्याः । १वचायां, २राजिकायाम्, ३कन्थार्य्यां, राजनि०। ५जीवन्त्याञ्च शब्दच० । ६श्वेतवचायां मेदि० ७सूक्ष्मैलायाम्,रत्नमा०। [रत्नमा०।

**तीक्ष्णतण्डुला** स्त्री० तीक्ष्णास्तण्डुला यस्याः । पिप्पल्याम्

**तीक्ष्णतैल** न० तीक्ष्णस्य स्नेहः तैलच् । १स्नुहीक्षीरे, २सर्जरसे, ३मद्ये च शब्दरत्ना० ।

**तीक्ष्णदंष्ट्र** पुंस्त्री तीक्ष्णा दंष्ट्रास्य।१व्याघ्रे राजनि० स्त्रियां ङीप् कर्म्म० । तीक्ष्णायां दंष्ट्रायाम् स्त्री । “सुतीक्ष्णदंष्ट्राः समाश्च शुभाः” वृ० स० ६७ अ० ।

**तीक्ष्णधार** पु० तीक्ष्णा धारास्य । १खड्गे “असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपालो नमोऽस्तु ते । इत्यष्टौ तव नामानि” खड्गपूजा-